# Vishnu Nakshatramala

# વિષ્ણુનક્ષત્રમાલા

## Document Information

Text title : Vishnu Nakshatramala 27+1 verses

File name : viShNunakShatramAlA.itx

Category : vishhnu

Location : doc_vishhnu

Author : Shvetaranya Narayana

Proofread by : Gopalakrishnan, NA

Description/comments : From Vrittalamkararatnavali by Shvetaranya Narayana

Latest update : September 26, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 19, 2022

*sanskritdocuments.org*

# વિષ્ણુનક્ષત્રમાલા

વન્દે નન્દિતજિષ્ણું ઘનરોચિષ્ણું ઘનાઘમભિભૂષ્ણુમ્ ।
નિરયં નિરાકરિષ્ણું હૃદિ વર્તિષ્ણું હૃતામયં વિષ્ણુમ્ ॥ ૧॥

વન્દે મન્દિતતૃષ્ણં નન્દિતકૃષ્ણં નમજ્જનાનુષ્ણમ્ ।
સતતમસાધુમહોષ્ણં સાધુસતૃષ્ણં સકૌસ્તુભં કૃષ્ણમ્ ॥ ૨॥

ભુવનવિમોહનરૂપં યદુકુલદીપં યમીશસુપ્રાપમ્ ।
માધવમપાસ્તતાપં મધુરાલાપં નમામિ નતગોપમ્ ॥ ૩॥

ઉત્પાદિતસુમબાણં જિતમુરબાણં કૃતાખિલત્રાણમ્ ।
દદતં નિષ્પરિમાણં સ્થિરનિર્વાણં ભજે રમાપ્રાણમ્ ॥ ૪॥

વિદલિતવિવિધસુરારિં વિજિતવલારિં નમામિ નરકારિમ્ ।
ધૃતનન્દકતરવારિં પદસૃતવારિંપરાત્પરં શૌરિમ્ ॥ ૫॥

દીનજનાવનદક્ષં દીર્ણવિપક્ષં દયાભૃતાવેક્ષમ્ ।
દિતિભવગજહર્યક્ષં દેવાધ્યક્ષં ભજે સરોજાક્ષમ્ ॥ ૬॥

જીર્ણં તુલસીપર્ણં તૂર્ણં સ્વીકૃત્ય વેશ્મ વિસ્તીર્ણમ્ ।
પૂર્ણં ધાન્યમજીર્ણં સ્વર્ણં કૃષ્ણેન કિન્નુ ન વિતીર્ણમ્ ॥ ૭॥

શ્રુતિયુવતિચિકુરરત્નં કૌસ્તુભરત્નં જગચ્ચ નિર્યત્નમ્ ।
દધતં નમતાં પ્રત્નં ચિન્તારત્નં ભજામિ યદુરત્નમ્ ॥ ૮॥

દ્વારં કૃત્વા પાર્થં યસ્તત્ત્વાર્થં જગૌ તમત્યર્થમ્ ।
કૃષ્ણમબુધ્બા વ્યર્થં કાલં સ્વાર્થં નયામિ વાઽન્યાર્થમ્ ॥ ૯॥

સુન્દરપદારવિન્દં સમનુતિનિન્દં સમર્પિતાનન્દમ્ ।
નન્દકકરં મુકુન્દં નન્દિતનન્દં નમામિ ગોદિન્દમ્ ॥ ૧૦॥

કમલાં વક્ષસિ કલયન્કમ્બું રચયન્ કરે શુચં દલયન્ ।
અચલં કુશલં જનયન્ અભયં કથયન્ પુરોઽસ્તુ હરિરુદયન્ ॥ ૧૧॥

પ્રભુમવનતજનમોદં પ્રકટિતવેદં પ્રભાજિતામ્ભોદમ્ ।
કરિગિરિશિખરવિનોદં કમલાહ્લાદં કદાપિ નાવેદમ્ ॥ ૧૩ ॥

અચ્યુતમધિગતરઙ્ગંરમણીયાઙ્ગં રમાકૃતાલિઙ્ગમ્ ।
તલ્પિતશેષભુજઙ્ગં તાર્ક્ષ્યશતાઙ્ગં ભજામિ ધૃતશાર્ઙ્ગમ્ ॥ ૧૩ ॥

વેઙ્કટશૈલાવાસં વેદશ્વાસં વિપાટિતાયાસમ્ ।
નન્દિતવેદવ્યાસં નીરદભાસં હરિં ભજન્નાસમ્ ॥ ૧૪ ॥

સદ્ગુણરત્નનિશાન્તં સતતં ભાન્તં સતામધિસ્વાન્તમ્ ।
ભવગદવૈદ્યમનન્તં ભવુકોદન્તં ભજે રમાકાન્તમ્ ॥ ૧૫ ॥

વૃન્દાવનસઞ્ચારી કંસવિદારી કિરીટિહિતકારી ।
યમુનાતીરવિહારી કૌસ્તુભધારી પુરોઽસ્તુ મધુવૈરી ॥ ૧૬ ॥

સુખયતુ જગતાં કર્તા નમતાં ભર્તા મુરસ્ય સંહર્તા ।
ચક્રગદાદરધર્તા વિપદપહર્તા રમાધરાભર્તા ॥ ૧૭ ॥

સકલચરાચરનેતાસમ્પદ્દાતા સમસ્તરિપુજેતા ।
સુખયતુ ભદ્રભ્રાતા સુખસન્ધાતા સુમાયુધાધાતા ॥ ૧૮ ॥

ચમ્પકવનવાસ્તવ્યં સન્તતભવ્યં સુરાલિસમ્ભાવ્યમ્ ।
દેવીદક્ષિણસવ્યં ગોપંદિવ્યં વિહાય કિં સેવ્યમ્ ॥ ૧૯ ॥

નરનારાયણનામા નવઘનધામા નિરસ્તભવદામા ।
સુખયતુ બદરીધામા સુખિતસુદામા સુરેષુ સપ્રેમા ॥ ૨૦ ॥

અવને પ્રતિભાવન્તં હૃદિ મણિમન્તં શ્રિતે દયાવન્તમ્ ।
ભુવને વિભૂતિમન્તં શ્રિયિ રતિમન્તં ભજામિ ભગવન્તમ્ ॥ ૨૧ ॥

દ્વારાટ્ટધ્વજવત્યાં દ્વારાવત્યાં સ્થિતં પ્રભાવત્યામ્ ।
મધુયદુવૃષ્ણિમહત્યાં મઙ્ગલવત્યાં હરિં દધે મત્યામ્ ॥ ૨૨ ॥

સન્તં દ્વારાવત્યાં સુકૃતવસત્યાં જિતામરાવત્યામ્ ।
પ્રાસાદજાલવત્યામુત્સવવત્યાં હરિં દધે મત્યામ્ ॥ ૨૩ ॥

કમ્બુસહોદરકણ્ઠં નતભયકુણ્ઠં નમામિ વૈકુણ્ઠમ્ ।
સજ્જનલસદુપકણ્ઠં શ્રીવૈકુણ્ઠં શ્રિતં રમોત્કણ્ઠમ્ ॥ ૨૪ ॥

પદરુચિજિતાબ્જશોભં પદ્માલોભં પરાસ્તવિક્ષોભમ્ ।
પાટિતવિમતમહેભં પઙ્કજનાભં પ્રણૌમિ જલદાભમ્ ॥ ૨૫ ॥

વિમલગુણપ્રાગ્ભારં વિશ્વાધારં વિધેર્વિધાતારમ્ ।
વિનુતં વિબુધૈર્ધીરં વીરમુદારં વિનૌમિ યદુશૂરમ્ ॥ ૨૬॥

પ્રતિપાદિતપુરુષાર્થં પ્રમુદિતપાર્થં પ્રકૃષ્ટગુણસાર્થમ્ ।
પ્રભુમચ્યુતમત્યર્થં પ્રાસ્તાનર્થં પ્રણૌમિ તત્ત્વાર્થમ્ ॥ ૨૭॥

વિષ્ણોસ્તારામાલાં પઠિતુરબાલાં શ્રિયઞ્ચ ધારાલામ્ ।
સ્વસ્મિન્ ભક્તિમલોલાં વચસાં વિમલાં હરિર્દિશેન્માલામ્ ॥ ૨૮॥

ઇતિ શ્વેતારણ્યનારાયણયજ્વકૃતા વિષ્ણુનક્ષત્રમાલા સમ્પૂર્ણા ॥

Proofread by Gopalakrishnan, NA

*Vishnu Nakshatramala*

pdf was typeset on August 19, 2022

Please send corrections to *sanskrit@cheerful.com*